# Prayana Gitam

# प्रयाणगीतम्

## Document Information

Text title : Prayana Gitam

File name : prayANagItam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# प्रयाणगीतम्

(गीतिका)

प्रयाहि वीर । सन्ततं
    प्रयाहि वीर । सन्ततम् ।
प्रयाणमेव जीवनम्,
    प्रयाणमेव जीवनम् ॥ प्रयाहि० ॥

जगत् प्रयाति सन्ततं
    धरा प्रयाति सन्ततम् ।
मरुत् प्रयाति सततं
    सरित् प्रयाति सततम् ॥ प्रयाहि० ॥

यतिः प्रयाति सन्ततं
    मतिः प्रयाति सन्ततम् ।
चमू प्रयाति सन्ततं
    धनं प्रयाति सततम् ॥ प्रयाहि० ॥

गति सुधौघ-दायिनी
    गति सदेष्ट साधनी ।
गति सुखावहा मता
    गतिश्च दुःख-नाशनी ॥ प्रयाहि० ॥

प्रघृष्ट शत्रु-संयुता
    चमू विदारयन् सदा ।
जय ध्वनिं प्रणोदयन्
    जय लभस्व सन्ततम् ॥ प्रयाहि० ॥

स्व मातृ भारती स्तुवन्
    स्व-देश-भक्तिमाश्रयन् ।
स्व-राष्ट्र-गौरवं भजन्

लभस्व गौरवं सदा ॥ प्रयाहि० ॥

इयं धरा हुतात्मभि
स्व-रक्त दान-पाविता ।
न शत्रु-दोष दूषिता
तथा यतस्व सन्ततम् ॥ प्रयाहि० ॥

अशेषप-क्लेष सन्तति
र्समस्त विघ्न संहतिम् ।
सदाऽऽत्म शक्ति संयुतं
सहस्व सिंहवद् मुदा ॥ प्रयाहि० ॥

सदाऽशिषा युतो भव
नत स्व मात-पादयोः ।
सदा श्रयस्व गौरवं
स्वदेश-भक्ति भावितः ॥ प्रयाहि० ॥

सदा अमित्र-मर्दन
सदा सुहृद्म भञ्जनम् ।
स्वदेश-कीर्ति-वर्धनं
प्रयाहि सिंहवत् सदा ॥ प्रयाहि० ॥

Proofread by Mandar Mali

*Prayana Gitam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*